# Arunachala and Pinakini Stuti

# अरुणाचलपिनाकिनीस्तुतिश्च

## Document Information

Text title : Arunachala Stuti

File name : aruNAchalastutiH.itx

Category : misc, stotra, tIrthakShetra, vAsudevAnanda-sarasvatI

Location : doc_z_misc_general

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : August 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 28, 2021

*sanskritdocuments.org*

# अरुणाचलपिनाकिनीस्तुतिश्च

काश्यां मुक्तिर्मरणादरुणाख्यस्याचलस्य तु स्मरणात् ।
अरुणाचलेशसंज्ञं तेजोलिङ्गं स्मरेत्तदामरणात् ॥ १॥

पिनाकिनीस्तुतिः
द्विधेह सम्भूय धुनी पिनाकिनी द्विधेव रौद्री हि तनुः पिनाकिनी ।
द्विधा तनोरुत्तरतोऽपि चैको यस्याः प्रवाहः प्रववाह लोकः ॥ २॥

प्रावोत्तरा तत्र पिनाकिनी या स्वतीरगान् संवसथान्पुनानी ।
अस्याः परो दक्षिणतः प्रवाहो नानानदीयुक् प्रववाह सेयम् ॥ ३॥

लोकस्तुता याम्यपिनाकिनीति स्वयं हि या सागरमाविवेश ।
मनाक् साधनार्तिं विना पापहन्त्री पुनानापि नानाजनाद्याधिहन्त्री ।
अनायासतो या पिनाक्याप्तिदात्री पुनात्वहंसो नः पिनाकिन्यवित्री ॥ ४॥

अरुणाचलतः काञ्च्या अपि दक्षिणदिक्स्थिता ।
चिदम्बरस्य कावेर्या अप्युदग्या पुनातु माम् ॥ ५॥

याधिमासवशाच्चैत्र्यां कृतक्षौरस्य मेऽल्पका ।
स्नापनाय क्षणाद्वृद्धा साद्धासेव्या पिनाकिनी ॥ ६॥

इति श्रीवासुदेवानन्दसरस्वतीविरचिता अरुणाचलपिनाकिनीस्तुतिश्च समाप्ता ।

*Arunachala and Pinakini Stuti*
pdf was typeset on August 28, 2021

Please send corrections to *sanskrit@cheerful.com*